करणमित्यन्वयव्यतिरेकाभ्यां तत्तत्पदानां विशेषार्थवाचकत्वावधारणमिति द्रष्टव्यम्। व्याकरणमपि तथा, तद्धि कर्म्मणि द्वितीयेत्यादिना द्वितीयादीनामर्थविशेषे प्रयोगनियमाय प्रवृत्तं द्वितीयादीनामर्थमप्यवगमयति तथा हि कर्म्मण्येव द्वितीया शक्ता न करणादौ, कर्मणि द्वितीयैव शक्ता न तृतीयेत्येवं द्विविधनियमपरतया प्रवृत्तं शास्त्रं नियमतदतिक्रमयोः पुण्यापुण्यफले दर्शयत् तत्तच्छब्दानां तत्तदर्थेष्वेव साधुतोक्त्या शक्तिमवगमयति। तदुक्तं भाष्यकारैः "सुपां कर्मादयोऽप्यर्थाः संख्या चैव तथा तिङाम्। प्रसिद्धानियमस्तत्र नियमः प्रकृतेषु चेति"। उपमानमपि शक्तिग्राहकम्। यथा गोसदृशो गवय इत्युपदेशवाक्यं श्रुतवतो ग्रामस्थपुरुषस्य वनगमनादनन्तरं गोसदृशपिण्डदर्शने उपदिष्टं वाक्यं स्मरतश्च ईदृक् पिण्डो गवयपदवाच्य इति भवति मतिरित्युपमानरूपोपदेशवाक्यस्य गवयपदशक्तिग्राहकत्वम्। तत्र च व्याकरणादीनामप्रवृत्तेः प्रकृतिप्रत्ययाधीनोपस्थितविषये एव व्याकरणस्य, रूढिविषये च कोषस्योपयोगात्तदभावाच्च तस्यैव तत्र तथात्वम्। कोषोऽपि अनपेक्ष्यैव प्रकृतिप्रत्ययादिविभागं केषाञ्चित् पदजातानां रूढिज्ञानाय प्रवर्त्तमानो मण्डपघटादिशब्दानां शक्तिमवगमयति। आप्तवाक्यमपि तथा, व्याकरणादिशक्तिधीहेतुज्ञानेऽपि यथार्थज्ञानवताप्तोपदेशेन तत्तच्छब्दानां तत्तदर्थेषु शक्तिग्रहः। व्यवहारतस्तु दर्शितः। वाक्यशेषोऽपि तद्ग्रहे हेतुः यथा स्वर्गकामो यजेतेत्यादौ श्रुतस्वर्गपदस्य अर्थविशेषमजानतामधिकारिणां तच्छक्तिबोधनाय प्रवृत्तेन "यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम्। अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदमिति" वाक्यशेषब्राह्मणेन दुःखासंभिन्नत्वादिमति सुखविशेषे एव स्वर्गपदस्य शक्तिग्रहः। व्याख्यानरूपा टीकादिपदाभिधेया विवृतिरपि तत्तच्छब्दानां तत्तदर्थेषु शक्तिं ग्राहयति यथा पचतिपदस्य पाकं करोतीति व्याख्या पाककर्त्तर्य्येवमन्यत्रापि। प्रसिद्धपदसामानाधिकरण्यमपि तद्ग्रहे हेतुः। पिकादिशब्दार्थमविदुषामुपदेशाय प्रवृत्तेन सहकारतरौ मधुरं रौति पिक इति वाक्येन प्रत्येकशक्त्या ज्ञातशक्तिकपदोपस्थापितार्थे मधुरशब्दकारके पिकशब्दस्य शक्तिग्रहः। एवं कोषादावपि "सत्कृत्यालङ्कृतां कन्यां यो ददाति स कूकुदः" इत्यादौ प्रसिद्धपदोपस्थापितार्थे सत्कारपूर्व्वकालङ्कृतकन्यादातरि कूकुदपदस्य शक्तिग्रहः। अत्र च प्रसिद्धपदसान्निध्यं नाम अर्थविशेषे निश्चितशक्तिकपदसामानाधिकरण्यम् सामानाधिकरण्यञ्च स्वबोध्यार्थेऽभेदेनान्वयबोधजनकत्वम्। वैयाकरणमते चाख्यातप्रथमान्तार्थयोरप्यभेदेनान्वयस्वीकारः। अतो मधुरं रौति कन्यां ददातीत्यादावाख्यातान्तस्य प्रथमान्तसामानाधिकरण्यं सुलभमेव। अतएव च भाष्ये "लटः शतृशानचावप्रथमासमानाधिकरणे" इति सूत्रे अप्रथमासमानाधिकरणे इति निर्द्देशादन्यत्र लटः प्रथमान्तसामानाधिकरण्यमुपपादितमुपपादितञ्च "आदेशे सामानाधिकरण्यं दृष्ट्वाऽनुमानादन्तव्यं स्थानिनः सामानाधिकरण्यमित्यादिना" लटः स्थानिलकारसामान्यस्य प्रथमान्तसमाधिकरण्यम्। एतेन ददानः कूकुदः स्मृत इत्यादि पाठकल्पनमपि परेषामनादेयमेवेति"।

**अभिधान** न० अभि+धा—भावे ल्युट्। १ कथने। करणे ल्युट् १नामनि, २शब्दार्थप्रतिपादके निघण्टुकोषादिनामके ग्रन्थे च। तथा च शब्दादानामर्थविशेषे शक्तिग्राहकं कोषादिकमेव अभिधानशब्दवाच्यम् तच्चामरादिनाना कोषादिकम्। तत्र च प्रायेण एकार्थवाचकानां पर्य्यायशब्दानां क्वचिच्च नानार्थानामपि शब्दानां संघ उपदिष्टः तेषां शक्तिग्राहकत्वञ्च अभिधाशब्दे दर्शितम्।

**अभिधानी** स्त्री आभिधीयते आभिमुख्येन धीयते बन्धेनानया अभि+धा—करणे ल्युट्। १ रज्जौ तया हि बध्यनेन बध्यमाभिमुख्येन स्थाप्यते। "इमामगृभ्णन् रशनामृतस्य इत्यश्वाभिधानीमादत्ते" इति तै०ब्रा०। "अभिधानीं रशनामिति" भा०। "तस्मा इन्द्रोवतस आसीद्गायत्र्यभिधान्यभ्रमूधः" अथ० ८,१०,१२। "भूमौर्व्वीभिरभिधानीभिर्हिता भवन्ति" कात्या० ३,४।

**अभिधामूला** स्त्री अभिधा मूलं यस्याः। आलङ्कारिकोक्ते व्यञ्जनाभेदे। अभिधाश्रयाय्यत्र अभिधालक्षणामूला शब्दस्य व्यञ्जना द्विधा अनेकार्थस्य शब्दस्य संयोगाद्यैर्नियन्त्रिते एकत्रार्थेऽन्यधीहेतुर्व्यञ्जना साभिधाश्रया" आद्यशब्दाद्विप्रयोगादयः"। उक्तं हि "संयोगो विप्रयोगश्च साहचर्यं विरोधिता। अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः। सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः। शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः" इति यथा सशङ्खचक्रो हरिः" इत्यत्र शङ्खचक्रसंयोगेन हरिशब्दो विष्णुमेवाभिधत्ते। अशङ्खचक्रो हरिः इति वियोगेन तमेव। भीमार्ज्जुनौ इति अर्ज्जुनः पार्थः। कर्णार्ज्जुनौ इति कर्णः सूतपुत्रः। स्थाणुं वन्दे इति स्थाणुः शिवः